श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्री सिंहाचलपञ्चाशत् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री सिंहाचलपञ्चाशत् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

सिंहाचलशिरोरत्नं चन्दनच्छन्नविग्रहम्।
सिंहाकृतिमहं कञ्चिच्छन्ददं समुपाश्रये॥ 1 ॥

हिरण्यपूर्वाक्षहरो वराहः
हिरण्यपूर्वं कशिपुं नृसिंहः।
अरण्यकान्तः कुतुकी निहत्य
शरण्यभूतोऽस्ति स सिंहशैले॥ 2 ॥

पारावारे दनुजतनयं पातितं पातुकामः
वाराहस्सन् परमपुरुषो यो जवादाविरासीत्।
स्तम्भात्तद्वन्नरहरिमयो यस्स्वयं सोऽयमत्र
श्रीमानास्ते हरिगिरिशिरश्चन्दनस्तम्भमध्ये॥ 3 ॥

प्रह्लादं परिपाल्य नाथ ! जलधेरुत्तीर्य तीराध्वना
वालस्पर्शविधूतपापममुकं कृत्वा प्रदेशं भुवः।
आरूढो ननु शैलमौलिमभवस्तेन प्रदेशोऽभवत्
वाल्टैर् सोऽयमभूदयं गिरिमणिः सिंहाचलः श्रीपते !॥ 4 ॥

अयस्तम्भं तादृक् पृथुलमतिसारं दृढतमं
भवानत्रैवाभूदयि झटिति भित्त्वा समुदितः।

न चेदस्मिन् देशे कथमतितरामीदृगुदियात्
अयो भूयादेवं कथमिति भवत्सन्निधिरपि ॥ 5 ॥

छन्दोगर्भगतस्सदा विहरसे स त्वं नृसिंह ! प्रभो !
सद्यो जात इति प्रथामधिगतस्तां च प्रथां दर्शयन्।
अस्मिंश्चन्दनमध्यगो गिरिमणौ प्रत्यब्दमेकं दिनं
सद्योजाततनुस्तरां विजयसे प्रह्लाददः पश्यताम् ॥ 6 ॥

शीते वारिनिधौ शिशौ रतमना मग्नस्तदा स्तम्भतः
यस्मादेष ततो वराहनृहरिः श्रीचन्दनस्तम्भगः।
आस्ते नित्यमथो सकृज्झटिति च प्राप्तः प्रकाशं पुनः
सर्वं कारणवन्मुधा किमपि नो नारायणस्य प्रभोः ॥ 7 ॥

विशाखपत्तनान्तिके विलोचनैकतोषके
सुशाखशाखिमण्डिते सुरासुराधिदैवते।
विशाखमुख्यसन्नुते विमानिवृन्दसेविते
सुशाखवेदविश्रुते सुखी स सिंहभूधरे ॥ 8 ॥

सद्यो जातं त्वां प्रपद्ये महान्तं
दैत्यं हन्तुं स्तम्भतस्संभ्रमेण।
सद्यो हृद्यामागतां लोकभूत्यै
कुर्वन्तं तामिन्दिरामङ्कभागे ॥ 9 ॥

भूम्या धृतो भूधरतः पतन् यः
प्रह्लादबालस्तममुं पयोधौ।
पतन्तमुद्धर्तुमहो वराहः
त्वं भूधरोऽभूर्नरसिंह ! नाथ ! ॥ 10 ॥

भूमावधो भूधरतः पतन्तं
त्वं पालयन् भूधर एव जातः।
सिंहाचलो नाम ततोऽयमासीत्
तवाचलं वक्ति जनोऽनभिज्ञः॥ **11** ॥

एतन्न सामान्यजना विदन्ति
वेदं च वेदामृतसारभूतम्।
वेदं तथा द्राविडरूपमिद्धं
विदन्ति चेत्तत्त्वमिदं विदन्ति॥ **12** ॥

स्वामिन्! वराहनरसिंह! नमो नमस्ते
श्रीकूर्मराज! बलभद्रसमेत! कृष्ण!।
एवं समुद्रतटवर्त्मनि सञ्चरन्तः
सन्तः स्तुवन्ति भगवन्! भवतोऽवतारान्॥ **13** ॥

मीनस्स्थले न भविता क्षणतोऽपि तस्मात्
तस्यालयो न खलु वारिधितीरभूमौ।
कूर्मो वराहनरसिंह! भवान् बलश्च
कृष्णश्च तत्र निवसन्ति परे क्व शेषाः?॥ **14** ॥

त्वं लाघवोदयवराहनृसिंह एव
सन् वामनस्सुभगभूधरसक्तचेताः।
नो भूधराभवकरो जमदग्निरामः
तस्मादिहेति मम धीर्वितनोति तर्कम्॥ **15** ॥

कल्की भविष्यति ततो न हि दृश्यते सः
स्वामिन्निहेति ननु सांप्रतमेवमेतत्।
एवं समुद्रतटपर्वतकाननेषु
त्वं दिव्यसिंह! विहृतिं वितनोषि नित्यम्॥ **16** ॥

शेषे समुद्रभुवने मम सिंह ! शेषे
रूपं ततश्च परिगृह्य निजेच्छयैव।
तत्तत्तटे च विहृतिं वितनोषि नाथ !
चित्ते ममाऽपि विहरस्व तथा दयार्द्रः ॥ **17** ॥

भ्राता हतो येन ममेति योऽयं
हिरण्यपूर्वः कशिपुस्स्ववैरः।
अचिन्तयत्तं यदतो वराह -
नृसिंहभावं त्वमिहाश्रितोऽसि ॥ **18** ॥

हिरण्यपूर्वं तमिहाक्षमेवं
हिरण्यपूर्वं कशिपुं च दैत्यम्।
हिरण्यगर्भादृतशक्तिपूर्णं
हिरण्यनाभाऽयि ! कथं व्यपोथीः ? ॥ **19** ॥

हिरण्ययुक्ताविति सोदरौ तौ
राजाधिराजाय नृसिंह ! तुभ्यम्।
निवेद्य नात्मानमिहापतुर्हा !
नयेन हीनौ स्वयमेव नष्टौ ॥ **20** ॥

हिरण्यनाभस्स भवान्नृसिंहः
हिरण्यगर्भो भवतः कुमारः।
हिरण्यहारिन् ! जनमेनमद्धा
हिरण्यकामेन करोतु हीनम् ॥ **21** ॥

त्वं गन्धवाहोऽसि नृसिंह तेऽद्रि -
स्तद्गन्धवाहाचल एष जातः।
पितुर्ममाभूदचलस्सदेवो
मातुर्यथेत्येति मुदं हनूमान् ॥ **22** ॥

सिंहाचले विहरसे सुभगाङ्गरागः
    नागाचले च नतलोकसमार्तिहारी।
तार्क्ष्याचले च नवधा तव दिव्यमूर्तिः
    शेषाचले च सकलेप्सितदानदीक्षः॥ **23** ॥

एवं परस्परविरुद्धपदस्थितस्त्वं
    "द्वेष्यो न मेऽस्ति न च कोऽपि तथा प्रियो मे"।
इत्युक्तमेव भगवन् ! प्रकटीकरोषि
    सर्वत्र हन्त ! सम एव ददासि सर्वम्॥ **24** ॥

त्वदात्मजो गन्धयुतप्रसून -
    बाणो जयत्यत्र जगन्ति स त्वम्।
गन्धेन क्लृप्तं कवचं दधानः
    जयस्यहो ! तेन जितानि तानि॥ **25** ॥

गन्धे स्थितां गन्धवतीं च पार्श्वे
    गन्धे स्थितस्त्वं किल सर्वगन्धः।
सिंहाचलेऽस्मिन् सुभगे नितान्तं
    नृसिंह ! युक्तं रमयन् स्थितोऽसि॥ **26** ॥

त्वमङ्गरागे नरसिंह ! लीनो
    मदन्तरङ्गे च महानुभावः।
अनङ्गरागं हि मदन्तरङ्गाद्
    व्यपोह्य मां शुद्धमहो ! विधत्से॥ **27** ॥

हिरण्यदैत्याङ्गगलत्प्रवाह -
    दुर्गन्धितादृग्रुधिराङ्गलिप्तः।
युक्तं प्रभो ! श्रीनरसिंह ! सत्यं
    सुगन्धलिप्तोऽत्र विभासि शैले॥ **28** ॥

समुद्रकन्या च समुद्रकाञ्ची
    कृत्वाभिषेकं तव सिंहशैले।
तीर्थैर्विशुद्धैरिह निर्झरोत्थै -
    र्गन्धानुलिप्तं कुरुतो नु भक्त्या ? ॥ **29** ॥

गन्धद्वारागन्धवत्योश्च मध्ये
    गन्धस्तम्भे संवसन्तं भवन्तम्।
गन्धर्वौघैरीड्यमानं सदेवै -
    र्गन्धर्वास्यं तर्कये त्वां नृसिंहम्॥ **30** ॥

सर्वतोमुखममुं स्म विशाखं
    सन्तनोषि यदशोकमिह त्वम्।
अक्षयामपि यदत्र तृतीयां
    आश्रितो भवसि वन्दित आप्तैः॥ **31** ॥

अक्षया कथमियं नु तृतीया
    पाठने बहुविदामपि सार्थैः।
आदृता जयति तत्र समाधि -
    स्त्वं प्रकाशमयसे यदतोऽत्र॥ **32** ॥

वराहनरसिंहतां वहसि नाथ ! सत्यं प्रभो !
    तृतीयजनिमानथो झटिति निर्गतस्स्तम्भतः।
प्रकाशमयसे ततो मधुभवे तृतीयातिथौ
    सुगन्धचयविग्रहादवतरन् लघुस्तम्भतः॥ **33** ॥

गन्धद्वारामिन्दिरां वक्ति वेदः
    भूमिं चैनां गन्धयुक्तां समेऽपि।
अस्मिन् क्षेत्रे गन्धमध्ये स्थितं त्वां
    सेवेते यत्तेन युक्तं तदेतत्॥ **34** ॥

सिंहाचलेश ! नरसिंह ! हिरण्यहारिन् !
    गन्धान्तरास्थितहरे ! करुणापयोधे !।
प्रह्लादपालक ! समस्तसुराभिवन्द्य !
    मां पाहि नित्यमपराधगणं विधूय॥ **35**॥

अत्रात्तगन्धानवितुं नृसिंह !
    त्वं मादृशान् त्वज्जनवेषमात्रान्।
अत्राप्तगन्धोऽसि कुतोऽन्यथैवं
    गन्धान्तरा लीनवपुस्सुगन्धः॥ **36**॥

शाखाकुलागमधरो मधुचूषणेन
    सर्वाभिनन्द्यविभवश्शुभनिर्झरार्द्रः।
वाराशितीरभुवि भाति पुराणमीनः
    स्वामिन् ! तवाद्रिरिति तर्कयते मनो मे॥ **37**॥

कूर्मस्तवाचलवरो न हि संशयोऽत्र
    सोऽयं यदत्र विबुधामृतलाभहेतुः।
धत्ते भवन्तमचलं किल भोगबद्धं
    यल्लालितं किल सुरैरसुरानुषक्तैः॥ **38**॥

स्वामिन् ! तवाद्रिमणिरेष महान् वराहः
    उच्चैर्नयन्नुपगतं जनमात्मभूमेः।
यद्भूधरस्सुभगभागवतस्तुताङ्गः
    सद्यः पयोधिमपहाय समीपतस्सन्॥ **39**॥

त्वमेव शैलोऽयमये ! नृसिंह !
    प्रह्लादसंपोषणदक्षदेहः।
वहन्निजाङ्के वनजातभूतिं
    कीर्त्यस्सदा सिंहमुखः प्रसिद्धः॥ **40**॥

त्रिविक्रमोऽयं तव शैलराजः
विश्वम्भरां व्याप्य दिवं च भूयः।
आत्माङ्गजातोत्तमवारिधारा -
संक्षालितश्रीयुतपाददेशः ॥ **41** ॥

शैलस्तवायं जमदग्निसूनु -
स्समस्तलोकस्तुतसत्प्रभावः।
प्रायोऽभिभूताखिलभूधरस्सन्
समुद्रवेलां समया निविष्टः ॥ **42** ॥

पनसादिभिरावृतं मुदा
कपिभिर्नृत्तसमुज्ज्वलैर्भृशम्।
अचलं नरसिंह ! तावकं
रघुवीरं जयिनं वितर्कये ॥ **43** ॥

नीलाम्बरस्पृक् समये हलेन
सम्भूषितप्रान्तधराभिरामः।
सर्वंसहावाहनतः प्रसिद्ध -
श्शैलस्तवाऽयं बलराम एव ॥ **44** ॥

संवर्धितार्जुनविभूतिरयं गिरिस्ते
नीलाम्बरेण घटितो भुवि विश्रुतस्सन्।
संलीनमेघविभवो निजशोभनाङ्गैः
कृष्णायते विमृशतां विबुधोत्तमानाम् ॥ **45** ॥

काले कराकलितसत्करवालकृत्त -
वक्रातिभीषणमहीरुहमानुषेड्यः।
स्वामिंस्तवायमचलो नरसिंह ! सत्यं
कल्कीति यामि शरणं कलिकालभीतः ॥ **46** ॥

धराधरेऽप्यत्र धरातलेऽस्मिन्
सुशीतलच्छायमहीरुहाढ्ये।
सुमृष्टसोपानपरम्पराभि -
र्विलोचनाभ्यां मुदमादधाने॥ **47**॥

प्रबन्धसेवाचतुरैर्महद्भि -
श्श्रीवैष्णवैरर्चकशेखरैश्च।
सन्दर्शनीये तव दिव्यगेहे
सदा रतिं याति मनो मदीयम्॥ **48**॥

सेवार्थिभिर्नाम समीरयद्भिः
स्त्रीभिस्समेतैः कृतपङ्क्तिबन्धैः।
गतागतैश्शोभितसन्निवेशं
त्वदालयं तं सततं स्मरामि॥ **49**॥

कण्ठ एव मे गन्ध इत्यहो
कारिजो मुनिर्युक्तमब्रवीत्।
गन्धमध्यगो वर्तसे यथा
कण्ठमध्यगो मे भवेत्ययम्॥ **50**॥

गन्धहस्तिनं पापसञ्चयं
भेत्तुमेव मे कोविदः परम्।
गन्धसिंहतामाश्रितोऽभवः
श्रीनिधेरतः स्तोत्रमुत्थितम्॥ **51**॥

पञ्चाननगिरिस्वामिपञ्चाशद्भूषिताननाः।
पञ्चशाखान्तरालीनपञ्चशाखिन एव ते॥ **52**॥

॥ इति श्री सिंहाचलपञ्चाशत् समाप्ता॥